# व्याकरणस्य भूमिका
## (शब्दानाम् अर्थस्य अवगमनसन्दर्भे)

**प्रदीप पौडेल**
वरिष्ठशोधाध्येता
संस्कृतसंवर्धनप्रतिष्ठानम्
krishna.pradeep1993@gmail.com

**सारांश:**

*यः वेदेषु शब्देषु कृतं लोपम्, आगमं आदेशं च जानाति सः एव वेदं सम्यक् रक्षयितुं शक्नोति नान्यः। वस्तुतः यः व्याकरणं न जानाति सः वेदार्थज्ञातुं न समर्थः एव यथा* ***परमे व्योमन्***[1] *अत्र व्योमन् शब्दः सप्तम्यर्थं बोधयति। यतः तत्र* ***सुपां सुलुग्.***[2] *इत्यादिना सूत्रेण सप्तम्याः लुगिति लुप्तस्य सप्तम्यर्थस्य कारणम् अवैयाकरणः कथं वा जानीयात् !! अतः शब्दानाम् अर्थावगमने व्याकरणस्य महत्त्वपूर्णा भूमिका प्रतिपदं दृश्यते।*

**प्रस्तावना**

**अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम्।**
**तत्त्वाबोधः शब्दानां नास्ति व्याकरणादृते ।।**[3]

शप आक्रोशे इति धातोः औणादिक-दन्-प्रत्ययेन पकारस्य च बकारादेशेन निष्पन्नः अयं 'शब्द' ध्वनिः रवः स्फोटः इत्यादिनाम्ना व्यवह्रियते। तत्र स्फोटः नाम स्फुटति अर्थो यस्मात् इति। अस्य श्रवणेन्द्रियद्वारा ग्राह्यः गुणपदार्थविशेषः इति अर्थः भवति।

अस्मिन् शब्दमये जगति शब्दानां साधुत्वम् अर्थात् कः शब्दः साधुः (शुद्धः) कश्च असाधुः (अशुद्धः) इत्यस्मिन् विषये व्याकरणम् एव प्रमाणम्। व्याकरणमेव सर्वनियन्त्रकं प्रधानभूतं च इति सर्वविदितमेव। अत एव व्याकरणं शब्दानुशासनम् इति नाम्ना अपि परिचीयते। वाक्यपदीयकारेण भर्तृहरिणा उक्तं च - **शब्दसाधुत्वविषया सैषा व्याकरणस्मृतिः।** अर्थात् शब्दानां साधुत्वप्रतिपादिका इयं साक्षात् व्याकरणस्मृतिः एव इति।

शब्दः नाम **येनोच्चारितेनार्थस्य सम्प्रत्ययः स शब्दः**। अर्थात् यस्य शब्दस्य उच्चारणेन अर्थस्य (द्रव्यस्य) ज्ञानं भवति सः शब्दः भवति। यथा – '**घट**'शब्दस्य उच्चारणेन कम्बुग्रीवादिमदर्थस्य बोधः जायते इति कारणेन घट इति शब्दः भवति। यथा वा '**गौ**' इति उच्चारणेन सास्ना-लाङ्गुलादिमतः अर्थस्य बोधः जायते। अतः गौ इत्यपि शब्दः भवति। उक्तमपि – भाष्यम्- **येनोच्चारितेन सास्नालाङ्गुलककुदकुरविषाणिनां सम्प्रत्ययोः भवति सः शब्दः।**[4]

---

[1] ऋक्वेदः – १- १६४ - ३९
[2] पा.सू – ७ – १ - ३९
[3] वाक्य. १.१३
[4] महाभाष्यम् – आ - १

अर्थात् येषां 'गौ'इत्यादिशब्दानाम् उच्चारणेन सास्ना-लाङ्गुल-ककुद-खुर-शृङ्गादि-युक्तस्य पदार्थस्य ज्ञानं भवति ते शब्दाः इति कथ्यन्ते। अयं च शब्दः भारतीयदर्शनेषु ब्रह्मस्वरूपः, सम्पूर्णं जगत् शब्दमयं चेत्यपि निगदितम्। **तस्मादेतस्माद् वा आकाशः सम्भूतः। आकाशाद्वायुः वायोरग्निरग्नेरापोऽद्भ्यः पृथ्वी समजायत इति**[5]**।**

अर्थात् प्रप्रथमम् आकाशस्य उत्पत्तिः सञ्जाता पुनः आकाशात् वायुः इत्येवं प्रकारेण सृष्टिक्रमः वर्तते। तत्र आकाशं शब्दगुणकम् अस्ति। **"आकाशस्य तु विज्ञेयः शब्दो वैशेषिको गुणः"**[6] **इति।** अस्य जगतः उत्पत्तिविनाशरूपायाः प्रक्रियायाः कारणं शब्दः इति प्रतिपादितं च भरतमुनिना वाक्यपदीये -

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्**

**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥ १ ॥**

अर्थात् शब्दरूपं ब्रह्म एव अस्य सम्पूर्णस्य जगतः उत्पत्तिलयादिकप्रक्रियायाः अर्थभावेन विस्तृतं भवति इति।

स च शब्दः कीदृशः अस्ति इत्यस्मिन् विषये शब्दस्वरूपं प्रतिपादयता भाष्यकारेण **वृषभ** इति शब्दस्य स्वरूपं कथितम्। अत्र कामनायाः वर्षणात् अर्थात् मनोगतस्य विषयस्य प्रतिपादनात् शब्दः 'वृषभः' इति कथितः। वृषभेण सह कथं तुलना भवति इति तु उक्तम् एव -

**चत्वारि शृङ्गा त्रयोऽस्य पादाः द्वे शीर्षे सप्तहस्तासोऽस्य**

**त्रिधा बद्धो वृषभो रोरवीति महोदेवो मर्त्याँ आविवेश ॥**[7]

अस्य शब्दस्य चत्वारि शृङ्गाणि सन्ति - अर्थात् नामाख्यातोपसर्गनिपाताः सन्ति। नाम इत्युक्ते प्रातिपदिकम्, आख्यातं नाम तिङ् इति। अस्य शब्दस्य त्रयः पादाः भूत-भविष्य-वर्तमानकालाः सन्ति, अस्य द्वे शीर्षे नित्यं कार्यं चेति वर्तेते। पुनश्च सप्तहस्ताः अर्थात् सप्तविभक्तयः, त्रिधा बद्धः त्रिषु स्थानेषु उरःकण्ठतालु इत्येतेषु स्थानेषु बद्धः च अस्ति। अयं च वृषभः पुनः पुनः शब्दं करोति। इति एतादृशः महादेवः शब्दः सर्वेषु मरणधर्मप्रकृतिषु मनुष्येषु प्रविष्टोऽस्ति। अनेन महादेवेन सह अस्माकं सायुज्यं यथा स्यात् इति तदर्थं शब्दप्रवर्तकम् इदं व्याकरणशास्त्रम् अध्येयम् इति। उक्तं च भाष्ये -

**महता देवेन नः सायुज्यं यथा स्यादित्यध्येयं व्याकरणम्।**[8]

व्याकरणम् इति अयं शब्दः एव स्वस्य अर्थस्य बोधने समर्थः अस्ति। अयं शब्दः - वि आङ् इति उपसर्गद्वयपूर्वकात् कृ-धातोः करणे अधिकरणे वा ल्युट्प्रत्ययेन निष्पन्नः भवति। यस्मात् व्याक्रियन्ते व्युत्पाद्यन्ते असाधुशब्दावधिकसाधुशब्दाः पृथक्क्रियन्ते अनेन अस्मिन्निति वा इत्येतावान्नर्थः लभते। व्याक्रियन्ते अर्थात् व्युत्पाद्यन्ते, कथं व्युत्पाद्यन्ते तर्हि असाधुशब्देभ्यः साधुशब्दानां पृथक्करणेन व्युत्पाद्यन्ते इति अस्य भावः।

तत्र लोके असाधुशब्दाः अनेके सन्ति। साधुशब्दाः च न्यूनाः सन्ति। अत एव भगवान् पाणिनिः असाधुशब्दानाम् आधिक्यात् तेषाम् अन्वाख्यानं (कथनम्) दुरूहमिति मत्वा साधुशब्दानाम् एव अन्वाख्यानं विदधाति। यथा 'गौः इति साधुः' इति कथनेन 'गोता' 'गोपतलिका' 'गोणी' इत्यादयः गौशब्दस्य अपभ्रंशभूताः शब्दाः असाधवः इति स्वयमेव ज्ञायन्ते। तत्र असाधुशब्दानां प्रयोगः न करणीयः साधुशब्दानामेव प्रयोगः विधातव्यः इति। उक्तं च -

---

[5] तैत्तिरीयोपनिषद् – 2-1-2

[6] न्यायकारिकावलिः - ४४

[7] ऋग्वेदः ४ - ५८ - ३

[8] महाभाष्यम् – आ - १

**दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह ।**
**स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ।।**

अर्थात् स्वरद्वारा वर्णद्वारा वा कृतः अशुद्धप्रयोगः वाग्रूपिणा शब्दवज्रेण प्रयोगकर्तारं हन्ति । यथा इन्द्रशत्रुः इत्यस्मिन् शब्दे स्वरस्य अपराधकारणेन यजमानस्य विनाशः संजातः । तथैव वर्णानां व्यत्यासेन यम् अर्थं मनसि निधाय शब्दप्रयोगः कृतः सः शब्दः तम् अर्थं न प्रतिपादयति अपि तु भिन्नमेव अर्थं बोधयति । वर्णानां मिथ्याप्रयोगेण अर्थाव्यत्यासः सम्भवति - अस्वमानय । अश्वमानय । अत्र `अस्वमानय' इत्यस्य धनरहितं जनम् आनय इति किन्तु अश्वमानय इत्यस्य तु हयम् आनय इति जायते । अतः शुद्धशब्दानामेव प्रयोगः विधेयः । अशुद्धशब्दानां न इति तु ज्ञातमेव । तत्र शुद्ध-अशुद्धविषये शब्दानां गूढार्थज्ञाने च व्याकरणमेव अस्माकं प्रमाणभूतम् । तत्रापि कथं साधु-असाधुविषये निर्णयः करणीयः इति चेत् व्याकरणशास्त्रद्वारा व्युत्पादितः अर्थात् प्रकृतिप्रत्यायाभ्यां निष्पादितः शब्दः साधुः, तद्भिन्नः शब्दः असाधुः इति ज्ञेयम् । अतः इदं व्याकरणशास्त्रं शब्दानां शासनं करोति । अतः एतं शब्दानुशासनम् इत्यपि कथ्यते । इदं च व्याकरणशास्त्रम् अन्यशास्त्राणाम् उपाकारित्वात् (अर्थावगमने सहायकत्वात्) आदिमं स्थानं लभते । **उक्तं च -**

**आसन्नं ब्रह्मणः तस्य तपसामुत्तमं तपः**
**प्रथमं छन्दसामङ्गं प्राहुर्व्याकरणं बुधाः ।।**[9]

अर्थात् बुधाः एतं व्याकरणं ब्रह्मणः साक्षादुपकारि, ब्रह्मचर्यम्, अधःशयनम्, अधोवासः चान्द्रायणं चेत्यादीनां तपसाम् उत्तमं दृष्टादृष्टफलप्रदायकं तपः, प्रधानत्वात् छन्दसां प्रथमम् अङ्गं च प्राहुः ।

**अन्यच्च -**

**तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम् ।**
**पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते ।।**[10]

अर्थात् यथा आयुर्वेदः शरीरस्य चिकित्सां करोति तथैव व्याकरणं वाचः चिकित्सां करोति । **तथैव -**

**अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम् ।**
**तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते ।।**[11]

वेदादिषु विद्यमानानां शब्दानां श्रवणमात्रेण अर्थनिर्धारणं क्लेशकरं भवति । यथा - वीरपुरुषं गच्छ । अत्र वीरपुरुषं तावत् समस्तपदं वर्तते । अत्र अस्य अर्थं ज्ञातुं व्याकरणेव शरणम् । यतः यदि कर्मधारयसमासाश्रियते तदा अत्र वी र पुरुषं गच्छ इत्येवम् अन्तोदात्तस्वरेण त्वं वीरपुरुषत्वं प्राप्नुहि इत्यर्थः समायाति । यदि च बहुव्रीहिः समासाश्रियते तदा तु वीरपुरुषं गच्छ इति पूर्वपदप्रकृतिस्वरेण[12] यस्मिन् ग्रामे वीरपुरुषाः सन्ति तत्र गच्छतु इति च अर्थः समायाति । एतच्च शब्दश्रवणमात्रेण अवैयाकरणेन अर्थं ज्ञातुं नैव शक्यते । अतः शब्दानां तत्वार्थस्य ज्ञानं व्याकरणात् ऋते नास्ति इति वाक्यपदीयकारस्य भर्तृहरेः भावः । तथैव व्याकरणस्य प्रयोजनानि प्रतिपादयता भाष्यकारेण निगद्यते -

---

[9] वाक्य. ११

[10] वाक्य. १४

[11] वाक्य. १३

[12] बहुव्रीहौ प्रकृत्या पूर्वपदम् (पा. सू. ६- २- १)

**रक्षोहागमलघ्वसंदेहाः प्रयोजनानि। रक्षार्थं वेदानामध्येयं व्याकरणम्।**
**लोपागमवर्णविकारज्ञो हि सम्यग्वेदान् परिपालयिष्यति।**[13]

अर्थात् यः वेदेषु शब्देषु कृतं लोपम्, आगमं आदेशं च जानाति सः एव वेदं सम्यक् रक्षयितुं शक्नोति नान्यः। वस्तुतः यः व्याकरणं न जानाति सः वेदार्थज्ञातुं न समर्थः एव यथा **परमे व्योमन्**[14] अत्र व्योमन् शब्दः सप्तम्यर्थं बोधयति। यतः तत्र **सुपां सुलुग्.**[15] इत्यादिना सूत्रेण सप्तम्याः लुगिति लुप्तस्य सप्तम्यर्थस्य कारणम् अवैयाकरणः कथं वा जानीयात् !! अतः शब्दानाम् अर्थावगमने महत्त्वपूर्णा भूमिका प्रतिपदं दृश्यते। अतः अध्येयं व्याकरणम्। अन्यच्च केवलं शब्दमात्रज्ञानेन अपि प्रयोजनं नास्ति। यस्मिन् ज्ञाने शब्दस्य तत्त्वार्थस्य अवगमनं न नास्ति केवलं शब्दमात्रस्य ज्ञानं वर्तते तादृशं ज्ञानम् अग्निरहितस्थले विद्यमानं शुष्ककाष्ठम् इव अनर्थकं वर्तते। यतः काष्ठं तु बहु शुष्कं किन्तु ज्वलनस्य असम्भवेन व्यर्थमिति। उक्तमपि –

**पुनश्च यदधीतमविज्ञातं निगदेनैव विद्यते**
**अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्।**

तात्पर्यमिदम् - यत् अस्माभिः अधीतं किन्तु तत् नावबुद्धम्, केवलेन शब्दोच्चारेण एव ज्ञातम्। अर्थात् अर्थज्ञानरहितं केवलशब्दश्रवणेनोत्पन्नं ज्ञानम्। एतच्च अनर्थकं ज्ञानम् अग्निरहितस्थले विद्यमानं शुष्ककाष्ठम् इव, यत् काष्ठं तु शुष्कं किन्तु वह्न्यभावस्थले विद्यमानेन तत् कदाचिदपि न वह्निसंयोगं प्राप्नोति न ज्वलिष्यति इति तस्य शुष्कतायाः प्रयोजनाभावः एव। **तस्मात् अनर्थकं माधिगीष्महीत्यध्येयं व्याकरणम्।**[16]

इत्येवं प्रकारेण प्रतिपदं शब्दानाम् अर्थनिर्धारणे व्याकरणस्य महत्ता दृश्यते, सर्वैः अनुभूयते च।

इदं व्याकरणशास्त्रं सर्वेषां व्याकरणपिपठिषूणां कृते आनुकूल्यं यथा स्यात् तदर्थं विद्याधिपौ भवानिशङ्करौ प्रार्थ्येते।

**सन्दर्भग्रन्थाः**

1. मीमांसकः युधिष्ठिर, **पातञ्जलमहाभाष्यम्**, रामलाल कपूर ट्रस्ट (सोनीपत हरियाणा) द्वितीय संस्करणम्
2. **पाणिनीय अष्टाध्यायी**, संस्कृतभारती, नवदेहली
3. **न्यायसिद्धान्तमुक्तावली,** चौखम्बा सुरभारती प्रकाशन

*****

[13] महाभाष्यम् – आ - १

[14] ऋक्वेदः – १- १६४ - ३९

[15] पा.सू – ७ – १ - ३९

[16] महाभाष्यम् आ -1